योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः २२

द्वाविंशः सर्गः २२

श्रीराम उवाच ।

अपर्याप्तं हि बालत्वं बलात्पिबति यौवनम् ।

यौवनं च जरा पश्चात्पश्य कर्कशतां मिथः ।। १

हिमाशनिरिवाम्भोजं वात्येव शरदम्बुकम् ।

देहं जरा नाशयति नदी तीरतरुं यथा ।। २

जर्जरीकृतसर्वाङ्गी जरा जरठरूपिणी ।

विरूपतां नयत्याशु देहं विषलवो यथा ।। ३

शिथिलादीर्णसर्वाङ्गं जराजीर्णकलेवरम् ।

समं पश्यन्ति कामिन्यः पुरुषं करभं यथा ।। ४

अनायासकदर्थिन्या गृहीते जरसा जने ।

पलाय्य गच्छति प्रज्ञा सपत्न्येवाहताङ्गना ।। ५

दासाः पुत्राः स्त्रियश्चैव बान्धवाः सुहृदस्तथा ।

हसन्त्युन्मत्तकमिव नरं वार्धककम्पितम् ।। ६

दुष्प्रेक्ष्यं जरठं दीनं हीनं गुणपराक्रमैः ।

गृध्रो वृक्षमिवादीर्घं गर्धो ह्यभ्येति वृद्धकम् ।। ७

दैन्यदोषमयी दीर्घा हृदि दाहप्रदायिनी ।

सर्वापदामेकसखी वार्धके वर्धते स्पृहा ।। ८

कर्तव्यं किं मया कष्टं परत्रेत्यतिदारुणम् ।

अप्रतीकारयोग्यं हि वर्धते वार्धके भयम् ।। ९

कोऽहं वराकः किमिव करोमि कथमेव च ।

तिष्ठामि मौनमेवेति दीनतोदेति वार्धके ।। १०

कथं कदा मे किमिव स्वादु स्याद्भोजनं जनात् ।
इत्यजस्रं जरा चैषा चेतो दहति वार्धके ।। ११
गर्धोऽभ्युदेति सोल्लासमुपभोक्तुं न शक्यते ।
हृदयं दह्यते नूनं शक्तिदौस्थ्येन वार्धके ।। १२
जराजीर्णबकी यावत्कायक्लेशापकारिणी ।
रौति रोगोरगाकीर्णा कायद्रुमशिरःस्थिता ।। १३
तावदागत एवाशु कुतोऽपि परिदृश्यते ।
घनान्ध्यतिमिराकाङ्क्षी मुने मरणकौशिकः ।। १४
सायंसंध्यां प्रजातां वै तमः समनुधावति ।
जरां वपुषि दृष्ट्वैव मृतिः समनुधावति ।। १५
जराकुसुमितं देहद्रुमं दृष्ट्वैव दूरतः ।
अध्यापतति वेगेन मुने मरणमर्कटः ।। १६
शून्यं नगरमाभाति भाति च्छिन्नलतो द्रुमः ।
भात्यनावृष्टिमान्देशो न जराजर्जरं वपुः ।। १७
क्षणान्निगरणायैव कासक्वणितकारिणी ।
गृध्रीवामिषमादत्ते तरसैव नरं जरा ।। १८
दृष्ट्वैव सोत्सुकेवाशु प्रगृह्य शिरसि क्षणम् ।
प्रलुनाति जरा देहं कुमारी कैरवं यथा ।। १९
सीत्कारकारिणी पांसुपरुषा परिजर्जरम् ।
शरीरं शातयत्येषा वात्येव तरुपल्लवम् ।। २०
जरसोपहतो देहो धत्ते जर्जरतां गतः ।
तुषारनिकराकीर्णपरिम्लानाम्बुजश्रियम् ।। २१
जरा ज्योत्स्नोदितैवेयं शिरःशिखरिपृष्ठतः ।
विकासयति संरब्धं वातकासकुमुद्वती ।। २२
परिपक्वं समालोक्य जराक्षारविधूसरम् ।
शिरःकूष्माण्डकं भुङ्क्ते पुंसां कालः किलेश्वरः ।। २३

जराजह्नुसुतोद्युक्ता मूलान्यस्य निकृन्तति ।
शरीरतीरवृक्षस्य चलत्यायुषि सत्वरम् ।। २४
जरामार्जारिका भुङ्क्ते यौवनाखुं तथोद्धता ।
परमुल्लासमायाति शरीरामिषगर्धिनी ।। २५
काचिदस्ति जगत्यस्मिन्नामङ्गलकरी तथा ।
यथा जराक्रोशकरी देहजङ्गलजम्बुकी ।। २६
कासश्वाससीत्कारा दुःखधूमतमोमयी ।
जराज्वाला ज्वलत्येषा यस्यासौ दग्ध एव हि ।। २७
जरसा वक्रतामेति शुक्लावयवपल्लवा ।
तात तन्वी तनुर्नृणां लता पुष्पानता यथा ।। २८
जराकर्पूरधवलं देहकर्पूरपादपम् ।
मुने मरणमातङ्गो नूनमुद्धरति क्षणात् ।। २५
मरणस्य मुने राज्ञो जराधवलचामरा ।
आगच्छतोऽग्रे निर्याति स्वाधिव्याधिपताकिनी ।।३०
न जिताः शत्रुभिः संख्ये प्रविष्टा येऽद्रिकोटरे ।
ते जराजीर्णराक्षस्या पश्याशु विजिता मुने ।। ३१
जरातुषारवलिते शरीरसदनान्तरे ।
शक्नुवन्त्यक्षशिशवः स्पन्दितुं न मनागपि ।। ३२
दण्डतृतीयपादेन प्रस्खलन्ती मुहुर्मुहुः ।
कासाधोवायुमुरजा जरा योषित्प्रनृत्यति ।। ३३
संसारसंसृतेरस्या गन्धकुट्यां शिरोगता ।
देहयष्ट्यां जरानाम्नी चामरश्रीर्विराजते ।। ३४
जराचन्द्रोदयसिते शरीरनगरे स्थिते ।
क्षणाद्विकासमायाति मुने मरणकैरवम् ।। ३५
जरासुधालेपसिते शरीरान्तःपुरान्तरे ।
अशक्तिरार्तिरापच्च तिष्ठन्ति सुखमङ्गनाः ।। ३६

अभावोऽग्रेसरी यत्र जरा जयति जन्तुषु ।

कस्तत्रेह समाश्वासो मम मन्दमतेर्मुने ।। ३७

किं तेन दुर्जीवितदुर्ग्रहेण

जरागतेनापि हि जीव्यते यत् ।

जराजगत्यामजिता जनानां

सर्वैषणास्तात तिरस्करोति ।। ३८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे जराजुगुप्सा नाम द्वाविंशतितमः सर्गः ।। २२ ।।